योगवासिष्ठः/प्रकरणम् ३ (उत्पत्तिप्रकरणम्)/सर्गः ०५१

अज्ञातलेखकः

एकपञ्चाशः सर्गः ५१

श्रीवसिष्ठ उवाच ।

हतो राजा हतो राजा प्रतिराजेन संयुगे ।

इतिशब्दे समुद्भूते राष्ट्रमासीद्भयाकुलम् ।। १

भाण्डोपस्करभाराढ्यं विद्रवच्छकटव्रजम् ।

साक्रन्दार्तकलत्राढ्यं द्रवन्नागरदुर्गमम् ।। २

पलायमानसाक्रन्दं मार्गाहृतवधूगणम् ।

अन्योन्यलुण्ठनव्यग्रलोकलग्नमहाभयम् ।। ३

परराष्ट्रजनानीकताण्डवोल्लाससारवम् ।

निरधिष्ठितमातङ्गहयवीरपतज्जनम् ।। ४

कपाटपाटनोड्डीनकोशान्तरवघर्घरम् ।

लुण्ठितासंख्यकौशेयप्रावृताभिभटोद्भटम् ।। ५

क्षुरिकोत्पाटितार्द्रान्त्रमृतराजगृहाङ्गनम् ।

राजान्तःपुरविश्रान्तचण्डालश्वपचोत्करम् ।। ६

गृहापहृतभोज्यान्नभोजनोन्मुखपामरम् ।

सहेमहारवीरौघपादाहतरुदच्छिशु ।। ७

अपूर्वतरुणाक्रान्तकेशान्तःपुरिकाङ्गनम् ।

चोरहस्तच्युतानर्घ्यरत्नदन्तुरमार्गगम् ।। ८

हयेभरथसंघट्टव्यग्रसामन्तमण्डलम् ।

अभिषेकोद्यमादेशपरमन्त्रिपुरःसरम् ।। ९

राजधानीविनिर्माणसारम्भस्थपतीश्वरम् ।

कृतवातायनश्वभ्रनिपतद्राजवल्लभम् ।। 3.51.१०

जयशब्दशतोद्घोषसिन्धुराजन्यनिर्भरम् ।

असंख्यनिजराजौघधृतसिन्धुकृतास्थिति ।। ११
ग्रामान्तरसमाक्रान्तविद्रवद्राजवल्लभम् ।
मण्डलान्तरसंजातनगरग्रामलुण्ठनम् ।। १२
अनन्तचोरमोषार्थरुद्धमार्गगमागमम् ।
महानुभाववैधुर्यसनीहारदिनातपम् ।। १३
मृतबन्धुजनाक्रन्दैर्मृततूर्यरवैरपि ।
हयेभरथशब्दैश्च पिण्डग्राह्यघनध्वनि ।। १४
सिन्धुदेवो जयत्येकच्छत्रभूमण्डलाधिपः ।
इत्यनन्तरमारेभे भेर्यः प्रतिपुरं तदा ।। १५
राजधानीं विवेशाथ सिन्धुरुद्धुरकन्धरः ।
प्रजाः स्रष्टुं युगस्यान्ते मनुर्जगदिवापरः ।। १६
प्रवृत्ता दशदिग्भ्योऽथ प्रवेष्टुं सैन्धवं पुरम् ।
कराः करिहयाकारै रत्नपूरा इवाम्बुधिम् ।। १७
निबन्धनानि चिह्नानि शासनानि दिशं प्रति ।
क्षणान्निवेशयामासुर्मण्डलं प्रति मन्त्रिणः ।। १८
उदभूदचिरेणैव देशे देशे पुरे पुरे ।
जीविते मरणे माने नियमोऽयमतो यथा ।। १९
अथ शेमुर्निमेषेण देशोपप्लवविभ्रमाः ।
प्रशान्तोत्पातपवनाः पदार्थावृत्तयो यथा ।। 3.51.२०
सौम्यतामाजगामाशु देशो दशदिगन्वितः ।
क्षीरोदः क्षुभितावर्तो द्रागिवोद्धृतमन्दरः ।। २१
ववुरलकचयान्विलोलयन्तो
मुखकमलालिकुलानि सैन्धवीनाम् ।
जललववलनाकुलाः समीरा
अशिवगुणानिव सर्वतः क्षणेन ।। २२

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये उत्पत्तिप्रकरणे लीलो० सिंधुराष्ट्रवर्णनं नामैकपञ्चाशः सर्गः ।। ५१ ।।